परिशिष्टम् – पाणिनेः सूत्राणां पद्धतिः

पाणिनेः एकं प्रमुखलक्ष्यं, प्रमुखकार्यम् अस्ति पदव्युत्पत्तिः। पदानि कथं निष्पन्नानि इति प्रदर्शनार्थं सूत्राणि विरचितानि। अतः आधिक्येन सूत्रेषु विशिष्टकार्याणि विहितानि भवन्ति–– अमुकवर्णस्य स्थाने अन्यवर्णः, अमुकवर्णः लुप्तः, अमुकवर्णः आगतः इत्यादीनि कार्याणि भवन्ति। एषां कार्याणां सङ्केतार्थं **विभक्तयः** प्रयुक्ताः सन्ति। तदर्थं सूत्रेषु विभक्तीनाम् अर्थाः किञ्चित् भिन्नाः सन्ति। पाणिनीयसूत्रेषु विभक्ति–अर्थाः के इति अधः सूचिताः।

**षष्ठीविभक्तिः** = **स्थाने**। सूत्रे यस्य वर्णस्य षष्ठीविभक्तिः भवति, सः "स्थानी" भवति— इत्युक्तौ तस्य स्थाने अन्यो वर्णः आयाति। कः वर्णः आयाति तस्य स्थाने ? तस्मिन् सूत्रे यस्य वर्णस्य प्रथमाविभक्तिः, सः।
**प्रथमाविभक्तिः** = **आदेशः**, **आगमः**, **नामकरणम्**। सूत्रे यस्य वर्णस्य प्रथमाविभक्तिः भवति, सः आयाति षष्ठीविभक्त्यन्तस्य वर्णस्य स्थाने। तत्र प्रथमाविभक्त्यन्तस्य वर्णस्य नाम "आदेशः"। सूत्रे तादृशः षष्ठीविभक्त्यन्तः वर्णो नास्ति चेत्, तत्र यदि प्रथमाविभक्त्यन्तः वर्णः आयाति (किन्तु अपरस्य वर्णस्य स्थाने इति न), तर्हि तस्य नाम "आगमः"।
**पञ्चमीविभक्तिः** = **परकार्यम्**। सूत्रे यस्य वर्णस्य पञ्चमीविभक्तिः भवति, सः निर्दिष्टात् कार्यात् पूर्वं स्थितः इत्यर्थः। नाम निर्दिष्टं कार्यं तस्मात् परम् अस्ति।
**सप्तमीविभक्तिः** = **पूर्वकार्यम्**। सूत्रे यस्य वर्णस्य सप्तमीविभक्तिः भवति, सः निर्दिष्टात् कार्यात् परं स्थितः इत्यर्थः। नाम निर्दिष्टं कार्यं तस्मात् पूर्वम् अस्ति।
**तृतीयाविभक्तिः** = **संयोजनम्**। सूत्रे यस्य वर्णस्य तृतीयाविभक्तिः भवति, सः निर्दिष्टेन वर्णेन सह संयुक्तः इत्यर्थः। तत्र निर्दिष्टं कार्यं तस्मात् पूर्वम् अपि परम् अपि अर्हति, परन्तु अयं तृतीयाविभक्त्यन्तः वर्णः निर्दिष्टेन कार्येण संयुक्तः भवेत्।

आदेशः = पूर्वं स्थितस्य वर्णस्य स्थाने अन्यवर्णस्य उदयः। यदि + अपि → [इ → य्] → यद्यपि।
आगमः = वर्णात् पूर्वं परं वा अन्यवर्णस्य उदयः। पठन् + आगच्छति → न्–आगमः → पठन्नागच्छति।
लोपः = वर्णस्य अदर्शनम्। बालकः + इच्छति → ःः–लोपः → बालक इच्छति।

माहेश्वराणि सूत्राणि

ये माहेश्वरसूत्राणां प्रसङ्गं न जानन्ति, सर्वप्रथमं भीतिः मास्तु ! अस्मिन् सारल्यम् अस्ति, अपि च सौन्दर्यम्। इमानि चतुर्दश माहेश्वराणि सूत्राणि इति––

अ इ उण्। ऋ लृक्। ए ओङ्। ऐ औच्। ह य व रट्। लण्। ञ म ङ ण नम्। झ भञ्। घ ढ धष्। ज ब ग ड दश्। ख फ छ ठ थ च ट तव्। क पय्। श ष सर्। हल्।

प्रत्याहारः = वर्णानां सङ्ग्रहः। प्रत्याहाराणाम् अन्ते इत्–संज्ञकाः वर्णाः स्थिताः। इमे इत्–संज्ञकाः वर्णाः प्रत्येकं प्रत्याहारस्य सीमारेखा भवन्ति। प्रत्याहारः नाम सङ्ग्रहः; अस्मिन् सङ्ग्रहे इत्–संज्ञकाः वर्णाः नान्तर्भूताः इति अवधेयम्। ते केवलं प्रत्याहारस्य सीमां कुर्वन्ति।

यथा एते प्रत्याहाराः—

अण् = अ, इ, उ

इक् = इ, उ, ऋ, ऌ

एच् = ए, ओ, ऐ, औ

झष् = झ, भ, घ, ढ, ध

जश् = ज, ब, ग, ड, द

अच् = अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ (सर्वे स्वराः)

हल् = सर्वाणि व्यञ्जनानि

अल् = सर्वे वर्णाः (सर्वे स्वराः + सर्वाणि व्यञ्जनानि)

उदा० यण्–सन्धिं बहवः जानन्ति | यथा यदि + अपि → [इ → य्] → यद्यपि | अत्र इ–स्थाने य्–आदेशो भवति | एतदर्थम् एकं सूत्रम् अस्ति | सूत्रस्य व्याख्यानं पठित्वा परिशीलयतु उपरितन–उपभागेषु के के उपस्थिताः सन्ति अस्मिन् व्याख्याने |

**इको यणचि** (६.१.७७, लघु० १५) = इकः स्थाने यण्–आदेशः भवति अचि परे संहितायां विषये | इकः यण् स्यात् असवर्णे अचि परे इति सूत्रस्य फलितः अर्थः इति ज्ञेयम् | इकः षष्ठ्यन्तं, यण् प्रथमान्तं, अचि सप्तम्यन्तं, त्रिपदमिदं सूत्रम् | **संहितायाम्** इत्यस्य अधिकारः | अनुवृत्ति–सहित–सूत्रमेवम्— **इकः यण् अचि संहितायाम्** इति |

यदि + अपि → [इ → य्] → यद्यपि | अत्र इकारः इक्–प्रत्याहारे अस्ति; यकारः यण्–प्रत्याहारे अस्ति | सूत्रे इक् षष्ठीविभक्तौ अस्ति अतः तस्य स्थाने कार्यं भवति; यण् प्रथमाविभक्तौ अस्ति अतः सः (यकारः) आदेश–रूपेण इकारस्य स्थाने आयाति; अच् सप्तमीविभक्तौ अस्ति अतः "अपि"–शब्दस्य अकारात् पूर्वं कार्यं भवति | कार्यं किम् ? इ–स्थाने य्–आदेशः |

Samskrita Bharati, 2068 Walsh Ave, Suite B2, Santa Clara, CA 95050, USA
info@samskritabharatiusa.org www.samskritabharatiusa.org
Tel:978-268-8406; Fax: 831-301-6972; EIN: 77-0545072